### द्वितीयः पाठः

# पाटलिपुत्रवैभवम्

[ बिहारराज्यस्य राजधानीनगरं पाटलिपुत्रं सर्वेषु कालेषु महत्वमधारयत्। अस्येतिहासः सार्धसहस्रद्वयवर्षपरिमितः वर्तते। अत्र धार्मिकक्षेत्रं राजनीतिक्षेत्रम् उद्योगक्षेत्रं च विशेषेण ध्यानाकर्षकम्। वैदेशिकाः यात्रिणः मेगास्थनीज-फाह्यान-ह्वेनसांग-इत्सिंगप्रभृतयः पाटलिपुत्रस्य वर्णनं स्व-स्व संस्मरणग्रन्थेषु चक्रुः। पाठेऽस्मिन् पाटलिपुत्रवैभवस्य सामान्यः परिचयो वर्तते। ]



प्राचीनेषु भारतीयेषु नगरेष्वन्यतमं पाटलिपुत्रमनुगङ्गं वसद्विचित्रं महानगरं बभूव। तद्विषये दामोदरगुप्तो नाम कविः कुट्टनीमताख्ये काव्ये कथयति-

अस्ति महीतलतिलकं सरस्वतीकुलगृहं महानगरम् ।
नाम्ना पाटलिपुत्रं परिभूतपुरन्दरस्थानम् ॥
(पद्य सं० 175)

इतिहासे श्रूयते यत् गङ्गायास्तीरे बुद्धकाले पाटलिग्रामः स्थितः आसीत् । यत्र च भगवान् बुद्धः बहुकृत्वः समागतः । तेन कथितमासीत् यद् ग्रामोऽयं महानगरं भविष्यति किन्तु कलहस्य अग्निदाहस्य जलपूरस्य च भयात् सर्वदाक्रान्तं भविष्यति । कालान्तरेण पाटलिग्रामः एव पाटलिपुत्रमिति कथितः । चन्द्रगुप्तमौर्यस्य काले अस्य नगरस्य शोभा रक्षाव्यवस्था च अत्युत्कृष्टासीदिति यूनानराजदूतः मेगास्थनीजः स्वसंस्मरणेषु निरूपयति । अस्य नगरस्य वैभवं प्रियदर्शिनः अशोकस्य समये सुतरां समृद्धम् ।

बहुकालं पाटलिपुत्रस्य प्राचीना सरस्वतीपरम्परा प्रावर्तत इति राजशेखरः स्वकाव्यमीमांसा-नामके कविशिक्षाप्रमुखे ग्रन्थे सादरं स्मरति

**अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः ।**
**वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः ॥**

कतिपयेषु प्राचीनसंस्कृतग्रन्थेषु पुराणादिषु पाटलिपुत्रस्य नामान्तरं पुष्पपुरं कुसुमपुरं वा प्राप्यते । अनेन ज्ञायते यत् नगरस्यास्य समीपे पुष्पाणां बहुलमुत्पादनं भवति स्म । पाटलिपुत्रमिति शब्दोऽपि पाटलपुष्पाणां पुत्तलिकारचनामाश्रित्य प्रचलितः । शरत्काले नगरेऽस्मिन् कौमुदीमहोत्सवः इति महान् समारोहः गुप्तवंशशासनकाले अतीव प्रचलितः । तत्र सर्वे जनाः आनन्दमग्नाः अभूवन् । सम्प्रति दुर्गापूजावसरे तादृशः एव समारोहः दृश्यते ।

कालचक्रवशाद् यद्यपि मध्यकाले पाटलिपुत्रं वर्षसहस्रपरिमितं जीर्णतामन्वभूत् । तस्य सङ्केतः अनेकेषु साहित्यग्रन्थेषु मुद्राराक्षसादिषु लभ्यते । मुगलवंशकाले अस्य नगरस्य समुद्धारो जातः । आंग्लशासनकाले च पाटलिपुत्रस्य सुतरां विकासो जातः । नगरमिदं मध्यकाले एव पटनेति नाम्ना प्रसिद्धिमगात् । अयं च शब्दः पत्तनमिति शब्दात् निर्गतः । नगरस्य पालिका देवी पटनदेवीति अद्यापि पूज्यते ।

सम्प्रति पाटलिपुत्रम् (पटना नाम नगरम्) अति विशालं वर्तते बिहारस्य राजधानी चास्ति । अनुदिनं नगरस्य विस्तारः भवति । अस्योत्तरस्यां दिशि गङ्गा नदी प्रवहति । तस्या उपरि गाँधीसेतुर्नाम एशियामहादेशस्य दीर्घतमः सेतुः किञ्च रेलयानसेतुरपि निर्मीयमानो वर्तते । नगरेऽस्मिन् उत्कृष्टः संग्रहालयः, उच्चन्यायालयः, सचिवालयः, गोलगृहम्, तारामण्डलम्, जैविकोद्यानम्, मौर्यकालिकः अवशेषः, महावीरमन्दिरम्-इत्येते दर्शनीयाः सन्ति । प्राचीनपटनानगरे सिखसम्प्रदायस्य पूजनीयं स्थलं दशमगुरोः गोविन्दसिंहस्य जन्मस्थानं गुरुद्वारेति नाम्ना प्रसिद्धं वर्तते । तत्र देशस्यास्य तीर्थयात्रिणः दर्शनार्थमायान्ति ।

एवं पाटलिपुत्रं प्राचीनकालात् अद्यावधि विभिन्नेषु क्षेत्रेषु वैभवं धारयति सर्वं च संकलितरूपेण संग्रहालये दर्शनीयमिति । पर्यटनमानचित्रे नगरमिदं महत्त्वपूर्णम् ।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| अन्यतमम् | – | एकतमम् | – | एक |
| मही | – | पृथ्वी | – | धरती |
| पुरन्दरः | – | इन्द्रः | – | इन्द्र |
| बहुकृत्वः | – | बहुशः कृत्वा | – | अनेक बार |
| आगतः | – | आगच्छत् | – | आया |
| आक्रान्तम् | – | संक्रान्तम् | – | घिरा |
| उत्कृष्टा | – | प्रकृष्टा | – | अच्छी |
| सुतराम् | – | अत्यधिकम् | – | और अधिक |
| प्रावर्तत | – | प्रचलिता | – | चलती थी |
| नामान्तरम् | – | अन्यत् नाम | – | दूसरा नाम |
| आश्रित्य | – | आधृत्य | – | आश्रय लेकर |
| अद्यावधि | – | अद्य पर्यन्तम् | – | आज तक |

## सन्धि विच्छेदः

| | | |
|---|---|---|
| नगरेष्वन्यतमम् | – | नगरेषु + अन्यतमम् |
| वसद्विचित्रम् | – | वसत् + विचित्रम् |
| गङ्गायास्तीरे | – | गङ्गायाः + तीरे |
| समागतः | – | सम् + आगतः |
| ग्रामोऽयम् | – | ग्रामः + अयम् |
| सर्वदाक्रान्तम् | – | सर्वदा + आक्रान्तम् |
| कालान्तरेण | – | काल + अन्तरेण |

| | | |
|---|---|---|
| अत्युत्कृष्ट्यासीदिति | – | अति + उत्कृष्ट्या + आसीत् + इति |
| सादरम् | – | स + आदरम् |
| अत्रोपवर्षवर्षाविह | – | अत्र + उपवर्षवर्षौ + इह |
| पाणिनिपिङ्गलाविह | – | पाणिनिपिङ्गलौ + इह |
| नगरस्यास्य | – | नगरस्य + अस्य |
| पुष्पाश्रिता: | – | पुष्प + आश्रिता: |
| उत्सवाश्च | – | उत्सवा: + च |
| नगरेऽस्मिन् | – | नगरे + अस्मिन् |
| शब्दोऽपि | – | शब्द: + अपि |
| पटनेति | – | पटना + इति |
| निर्गत: | – | नि: + गत: |
| अस्योत्तरस्याम् | – | अस्य + उत्तरस्याम् |
| गाँधीसेतुर्नाम | – | गाँधीसेतु: + नाम |
| किञ्च | – | किम् + च |
| रेलयानसेतुरपि | – | रेलयानसेतु: + अपि |
| नगरेऽस्मिन् | – | नगरे + अस्मिन् |
| इत्येते | – | इति + एते |
| गुरुद्वारेति | – | गुरुद्वारा + इति |
| देशस्यास्य | – | देशस्य + अस्य |
| अद्यावधि | – | अद्य + अवधि |

ABDUL SOLUTIONS ABSOL ★ PATNA ★

## प्रकृतिप्रत्ययविभागः

समागतः - सम् + आ + √गम् + क्त

स्थितः - √स्था + क्त

उत्कृष्टा - उत् + √कृष् + क्त + टाप्

निर्गतः - निः + √गम् + क्त

पूजनीयम् - √पूज् + अनीयर्

दर्शनीयम् - √दृश् + अनीयर्

आश्रित्य - आ + √श्रि + ल्यप्

ABDIEL SOLUTIONS ABSOL PATNA

## समासः

महानगरम् - महत् च तत् नगरम् (कर्मधारयः)

सरस्वतीकुलगृहम् - सरस्वत्याःकुलगृहम् (षष्ठी तत्पुरुषः)

महीतलतिलकम् - महीतलस्य तिलकम् (षष्ठी तत्पुरुषः)

कौमुदीमहोत्सवः - कौमुद्यां रचितः महोत्सवः (मध्यमपदलोपी समासः)

सचिवालयः - सचिवानाम् आलयः (षष्ठी तत्पुरुषः)

गोलगृहम् - गोलं तत् च गृहम् (कर्मधारयः)

तारामण्डलम् - ताराणां मण्डलानि सन्ति यस्मिन् तत् (बहुव्रीहिः)

## अभ्यासः

## ( मौखिकः )

1. पाटलिपुत्रनगरस्य विषये द्वे वाक्ये संस्कृतभाषायां वदत।

2. अधोलिखितानां समस्तपदानां विग्रहं वदत-सचिवालयः, गोलगृहम्, महीतलतिलकम्, महानगरम्, सरस्वतीकुलगृहम्।

3. सन्धि-विच्छेदं वदत -

नगरेष्वन्यतमम्, ग्रामोऽयम्, कालान्तरेण, पटनेति, निर्गतः

## अभ्यासः
## ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

(क) कुट्टनीमताख्यं काव्यं कस्य कवेः रचना अस्ति?

(ख) पाटलिपुत्रं कस्याः नद्याः तीरे अवस्थितमस्ति ?

(ग) चन्द्रगुप्तमौर्यस्य काले अस्य नगरस्य रक्षाव्यवस्था कीदृशी आसीत् ?

(घ) राज्ञः अशोकस्य समये अस्य नगरस्य वैभवं कीदृशम् आसीत् ?

(ङ) काव्यमीमांसानामकं ग्रन्थं कः अलिखत् ?

2. अधोलिखितानां शब्दानां सन्धिविच्छेदं कुरुत –

पाणिनिपिङ्गलाविह, अत्युत्कृष्टासीदिति, उत्सवाश्च, अस्योत्तरस्याम्, गाँधीसेतुर्नाम, नगरस्यास्य, पुष्पाश्रिता ।

3. सन्धिं कुरुत -

बहुलम् + उत्पादनम्

गङ्गायाः + तीरे

नगरे + अस्मिन्

च + अस्ति

शब्दः + अपि

सर्वदा + आक्रान्तम्

इति + एते

4. **अधोलिखितानां पदानां स्ववाक्येषु संस्कृते प्रयोगं कुरुत -**

यद्यपि, सम्प्रति, अतीव, महान्, नगरम्, अत्र

5. **रिक्तस्थानानि पूरयत -**

(क) गङ्गायाः उपरि गाँधीसेतुर्नाम ......... महादेशस्य दीर्घतमः सेतुः अस्ति।

(अफ्रीका / एशिया)

(ख) पाटलिपुत्रनगरे प्रसिद्धं ......................... अस्ति। (गोलगृहम् / ताजमहलम्)

(ग) पाटलिपुत्रस्य नामान्तरं ...................... प्राप्यते। (कुसुमपुरम् / माधवपुरम्)

(घ) कौमुदीमहोत्सवः ........................ अतीव प्रचलितः।

(आङ्ग्लशासनकाले / गुप्तशासनकाले)

(ङ) पाटलिपुत्रस्य .................... दिशि गङ्गा नदी प्रवहति। (पूर्वस्याम् / उत्तरस्याम्)

(च) गोविन्दसिंहः सिखसम्प्रदायस्य .................... गुरुः आसीत्। (प्रथमः / दशमः)

6. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत -**

(क) तत्र **तीर्थयात्रिणः** दर्शनार्थमायान्ति।

(ख) **मध्यकाले** पाटलिपुत्रं वर्षसहस्रपरिमितं जीर्णतामन्वभूत्।

(ग) मुगलकाले **पाटलिपुत्रस्य** समुद्धारो जातः।

(घ) तत्र सर्वे जनाः **आनन्दमग्नाः** अभूवन्।

(ङ) तत्र **भगवान् बुद्धः** बहुकृत्वः समागतः।

(च) नगरस्य शोभा **अशोकस्य** समये सुतरां समृद्धम्।

7. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत -**

(क) **काले-काले** उत्सवाः भवन्ति स्म।

(ख) **तस्य** सङ्केतः अनेकेषु ग्रन्थेषु लभ्यते।

(ग) **<u>नगरम्</u>** इदं पटनेति नाम्ना प्रसिद्धिमगात्।

(घ) **<u>कौमुदीमहोत्सवः</u>** महान् समारोहः आसीत्।

(ङ) **<u>दुर्गापूजावसरे</u>** तादृशः एव समारोहः दृश्यते।

**8. स्तम्भद्वये लिखितानां शब्दानां मेलनं कुरुत–**

| (क) | | (ख) |
|---|---|---|
| मही | – | आगच्छत् |
| सुतराम् | – | इन्द्रः |
| पुरन्दरः | – | पृथ्वी |
| अन्यतमम् | – | अत्यधिकम् |
| उत्कृष्टा | – | एकतमम् |
| आगतः | – | प्रकृष्टा |

## योग्यताविस्तारः

पाटलिपुत्रम् इतिहासस्य प्रारम्भिककालतः धार्मिक-सांस्कृतिक-राजनीतिक-आर्थिक-वैदेशिक-नीतिदृष्ट्या अत्यन्तं महत्त्वपूर्णं स्थानं धत्ते। भारतस्य महान् सम्राट् अशोकः अत्रैव जातः आसीत्। तस्य सम्बन्धे इयं प्रसिद्धिः वर्तते यत् सः स्वकीयान् नवनवतिं भ्रातृन् हत्वा राजसिंहासने समारूढः। हतानां भ्रातृणां प्रक्षेपणं यस्मिन् कूपे कृतवान् आसीत् स एव कूपः अधुना ''अगमकुआँ'' इति नाम्ना प्रसिद्धः।

## क्रियानुशीलनम्

(क) पाटलिपुत्रस्य अतीतं ज्ञातुं इतिहासशिक्षकस्य सहयोगेन पाटलिपुत्रस्य सिन्हा लाइब्रेरी, खुदाबख्श लाइब्रेरी, काशीप्रसाद जायसवाल संस्थान-गाँधीसंग्रहालय-पटना विश्वविद्यालय पुस्तकालयप्रभृतिपुस्तकालयेषु भ्रमणं कृत्वा ऐतिहासिकतथ्यानां पुरातात्त्विकतथ्यानां च संग्रहःकरणीयः।

(ख) कुम्हरार-खगौल-तरेगना-सबलपुर-मनेर-दीघा-महेन्द्रूघाट-राजगीरादिस्थानेषु शैक्षणिकभ्रमणं करणीयं तथा च एतेषां स्थानानाम् ऐतिहासिकतथ्यैः सह ज्योतिष-खगोल-विज्ञानसम्मततथ्यानि संग्रहणीयानि।

(ग) संस्कृतसाहित्यस्यापि योगदाने पाटलिपुत्रस्य महत् योगदानम् अस्ति। पतञ्जलि-कात्यायन-चाणक्य-वर्षोपवर्षप्रभृतीनाम् आचार्याणां प्रशंसनीया परम्परा संस्कृतसाहित्यस्य अनुसंधानेन ज्ञातव्या।

(घ) भारतीयस्वतन्त्रतासंग्रामस्य हुतात्मनां स्वातन्त्र्यवीराणां चित्रावली संग्रहणीया तस्याः प्रदर्शनी च आयोजनीया।

◘